श्री गायत्री हृदयं

श्री गायत्री हृदयं

||अथ श्रीमद्देवीभागवते महापुराणे गायत्रीहृदयं||

नारद उवाच |
भगवंदेवदेवेश भूतभव्य जगत्प्रभो |
कवचं च श्रुतं दिव्यं गायत्रीमंत्रविग्रहं ||1||

अधुना श्रोतुमिच्छामि गायत्रीहृदयं परं |
यद्धारणाद्भवेत्पुण्यं गायत्रीजपतोऽखिलं ||2||

श्रीनारायण उवाच |
देव्याश्च हृदयं प्रोक्तं नारदाथर्वणे स्फुटं |
तदेवाहं प्रवक्ष्यामि रहस्यातिरहस्यकं ||3||

विराड्रूपां महादेवीं गायत्रीं वेदमातरं |
ध्यात्वा तस्यास्त्वथांगेषु ध्यायेदेताश्च देवताः ||4||

पिंडब्रह्मांडयोरैक्याद्भावयेत्स्वतनौ तथा |
देवीरूपे निजे देहे तन्मयत्वाय साधकः ||5||

नादेवोऽभ्यर्चयेद्देवमिति वेदविदो विदुः |
ततोऽभेदाय काये स्वे भावयेद्देवता इमाः ||6||

अथ तत्संप्रवक्ष्यामि तन्मयत्वमयो भवेत् |
गायत्रीहृदयस्यास्याप्यहमेव ऋषिः स्मृतः ||7||

गायत्रीछंद उद्दिष्टं देवता परमेश्वरी |
पूर्वोक्तेन प्रकारेण कुर्यादंगानि षट् क्रमात् |
आसने विजने देशे ध्यायेदेकाग्रमानसः ||8||

अथार्थन्यासः | द्यौमूर्ध्नि दैवतं |
दंतपंक्तावश्विनौ | उभे संध्ये चौष्ठौ |

मुखमग्निः | जिह्वा सरस्वती | ग्रीवायां तु बृहस्पतिः |
स्तनयोर्वसवोऽष्टौ | बाह्वोर्मरुतः | हृदये पर्जन्यः |
आकाशमुदरं | नाभावंतरिक्षं | कट्योरिंद्राग्नी |
जघने विज्ञानघनः प्रजापतिः | कैलासमलये ऊरू |
विश्वेदेवा जान्वोः | जंघायां कौशिकः | गुह्यमयने |
ऊरू पितरः | पादौ पृथिवी | वनस्पतयोंगुलीषु |
ऋषयो रोमाणि | नखानि मुहूर्तानि | अस्थिषु ग्रहाः |
असृङ्मांसमृतवः | संवत्सरा वै निमिषं |
अहोरात्रावादित्यश्चंद्रमाः |
प्रवरं दिव्यां गायत्रीं सहस्रनेत्रां शरणमहं प्रपद्ये |
ॐ तत्सवितुर्वरेण्याय नमः | ॐ तत्पूर्वाजयाय नमः |
तत्प्रातरादित्याय नमः | तत्प्रातरादित्यप्रतिष्ठायै नमः |
प्रातरधीयानो रात्रिकृतं पापं नाशयति |
सायमधीयानो दिवसकृतं पापं नाशयति |
सायंप्रातरधीयानः अपापो भवति |
सर्वतीर्थेषु स्नातो भवति | सर्वैर्देवैर्ज्ञातो भवति |
अवाच्यवचनात्पूतो भवति | अभक्ष्यभक्षणात्पूतो भवति |
अभोज्यभोजनात्पूतो भवति | अचोष्यचोषणात्पूतो भवति |
असाध्यसाधनात्पूतो भवति | दुष्प्रतिग्रहशतसहस्रात्पूतो भवति |
पंक्तिदूषणात्पूतो भवति | अमृतवचनात्पूतो भवति |
अथाब्रह्मचारी ब्रह्मचारी भवती |
अनेन हृदयेनाधीतेन क्रतुसहस्रेणेष्टं भवति |
षष्टिशतसहस्रगायत्र्या जप्यानि फलानि भवंति |
अष्टौ ब्राह्मणान्सम्यग्ग्राहयेत् | तस्य सिद्धिर्भवति |
य इदं नित्यमधीयानो ब्राह्मणः प्रातः शुचिः सर्वपापः
प्रमुच्यत इति | ब्रह्मलोके महीयते |
इत्याह भगवान् श्रीनारायणः ||

इति श्रीदेवीभागवते महापुराणे द्वादशस्कंधे
गायत्रीहृदयं नाम चतुर्थोऽध्यायः |